# Contents


1 rAmacandraM 2

2 rAjIvalocanaM 3

3 dAsharathE 4

4 rAma janArdhana 5

5 dInabandho 6

6 pAhi mAM 7

## 1 rAmacandraM


# श्री मुत्तुस्वामि दीक्षित विरचित
# नोट्टु स्वर साहित्यम् (राम)


# रामचन्द्रम्

रागम्: शङ्कराभरणम् (२९)     ताळम्: चतुरश्र एकम्

रामचन्द्रं राजीवाक्षं श्यामळाङ्गं शाश्वतकीर्तिं

कोमलहस्तं कोसलराजं मामकहृत्कमलागारम्

मारुतियुक्तं धीमन्तं मानितभक्तं श्रीमन्तं

कौमारवरं गुरुगुहमित्रं कारुण्यनिधिं दशरथपुत्रम्

भूमिसुतापं भूपतिरूपं कोमलपल्लवपादं मोदं
कामगुरुं सीतारामं कौस्तुभभूषं वन्देऽहम् ॥

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇

## 2 rAjIvalocanaM

# श्री मुत्तुस्वामि दीक्षित विरचित

# नोट्टु स्वर साहित्यम् (राम)

# राजीवलोचनम्

रागम्: शङ्कराभरणम् (२९)     ताळम्: तिश्र एकम्

राजीवलोचनं रामचन्द्रं रामानुजाग्रं राजेन्द्रं

सद्गुणसान्द्रं कृपापाङ्गं सद्गुरुगुहमुदितं शान्तम्

रावणान्तकं जनकसुतारमणं भक्तभरणं

परमघनश्यामळं श्रीरघुकुलतिलकाभरणम्

भरतशत्रुघ्नसोदरं विभीषणविनुतपदं

सुग्रीवप्रमुखादिनुतपादपङ्कजं कौसल्यात्मजम्

कोदण्डकरं अहल्यादेवीशापविमोचनसुचरित्रं
कौस्तुभधारिणं कैवल्यप्रदं दशरथात्मजं भजेऽहम् ॥

◇ ◇ ◇ ◇ ◇

## 3 dAsharathE

# श्री मुत्तुस्वामि दीक्षित विरचित

# नोट्टु स्वर साहित्यम् (राम)

## दाशरथे

रागम्: शङ्कराभरणम् (२९)     ताळम्: तिश्र एकम्

दाशरथे दीनबन्धो दानवभीकर दामोदर

केशव मामव सीताधव केयूरहार रघुवीर

कोमलपादाब्ज कोदण्डराम श्यामळविग्रह संपूर्णकाम
नामकीर्त्तने सदामोद नारदवीणाह्ळादाह्ळाद ॥

◇ ◇ ◇ ◇ ◇

## 4 rAma janArdhana

# श्री मुत्तुस्वामि दीक्षित विरचित

# नोट्टु स्वर साहित्यम् (राम)

## राम जनार्दन

रागम्: शङ्कराभरणम् (२९) तालम्: तिश्र एकम्

रामजनार्दन रावणमर्दन रामानुजाग्रज राजविभो

पामरमोचन पङ्कजलोचन भक्तजनप्रिय पालय माम्

भूमिजानायक भुक्तिप्रदायक भूसुरपालन भूमिपते
श्यामळविग्रह शान्त गुरुगुहसंमत श्रीरामचन्द्र प्रभो ॥

◇ ◇ ◇ ◇ ◇

## 5 dInabandho

# श्री मुत्तुस्वामि दीक्षित विरचित

# नोट्टु स्वर साहित्यम् (राम)

## दीनबन्धो

रागम्: शङ्कराभरणम् (२९)     ताळम्: तिश्र एकम्

दीनबन्धो दयासिन्धो सुधीमणे मे मुदं देहि सदा देहि

जानकीनायकाम्भोजानन साधुसंरक्षणा-
पाङ्गाखिलदेवतासार्वभौमादिवन्द्य गुरुगुहनुत ॥

◇ ◇ ◇ ◇ ◇

## 6 pAhi mAM

# श्री मुत्तुस्वामि दीक्षित विरचित

# नोट्टु स्वर साहित्यम् (राम)

# पाहि मां जानकीवल्लभ

### रागम्: शङ्कराभरणम् (२९)  ताळम्: तिश्र एकम्

पाहि मां जानकीवल्लभ श्रीहरे भारतीशप्रियानन्तमूर्ते

देहि मे संपदं दीनचिन्तामणे देव देवोत्तमानन्दकीर्ते
एहि काकुत्स्थ कोदण्डहस्त ईप्सितार्थप्रदाह्लादचित्त ॥

◇ ◇ ◇ ◇ ◇◇ ◇ ◇ ◇ ◇